# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ५

सुकेशं धार्मिकं दृष्ट्वा वरलब्धं च राक्षसं ।
ग्रामणीर्नाम गन्धर्वो विश्वावसुसमप्रभः ॥ १ ॥

तस्य देववती नाम द्वितीया श्रीरिवात्मजा ।
तां सुकेशाय धर्मेण ददौ दक्षः श्रियं यथा ॥ २ ॥

वरदानकृतैश्वर्यं सा तं प्राप्य पतिं प्रियम् ।
आसीद्देववती तुष्टा धनं प्राप्येव निर्धनः ॥ ३ ॥

स तया सह संयुक्तो रराज रजनीचरः ।
अञ्जनादभिनिष्क्रान्तः करेण्वेव महागजः ॥ ४ ॥

देववत्यां सुकेशस्तु जनयामास राघव ।
त्रींस्त्रिणेत्र समान्पुत्रान्राक्षसान्राक्षसाधिपः ।
माल्यवन्तं सुमालिं च मालिं च बलिनां वरम् ॥ ५ ॥

त्रयो लोका इवाव्यग्राः स्थितास्त्रय इवाग्नयः ।
त्रयो मन्त्रा इवात्युग्रास्त्रयो घोरा इवामयाः ॥ ६ ॥

त्रयः सुकेशस्य सुतास्त्रेताग्निसमवर्चसः ।
विवृद्धिमगमंस्तत्र व्याधयोपेक्षिता इव ॥ ७ ॥

वरप्राप्तिं पितुस्ते तु ज्ञात्वैश्वर्यं ततो महत् ।
तपस्तप्तुं गता मेरुं भ्रातरः कृतनिश्चयाः ॥ ८ ॥

प्रगृह्य नियमान्घोरान्राक्षसा नृपसत्तम ।
विचेरुस्ते तपो घोरं सर्वभूतभयावहम् ॥ ९ ॥

सत्यार्जव दमोपेतैस्तपोभिर्भुवि दुष्करैः ।
सन्तापयन्तस्त्रींल्लोकान्सदेवासुरमानुषान् ॥ १० ॥

ततो विभुश्चतुर्वक्त्रो विमानवरमास्थितः ।
सुकेशपुत्रानामन्त्र्य वरदोऽस्मीत्यभाषत ॥ ११ ॥

ब्रह्माणं वरदं ज्ञात्वा सेन्द्रैर्देवगणैर्वृतम् ।
ऊचुः प्राञ्जलयः सर्वे वेपमाना इव द्रुमाः ॥ १२ ॥

तपसाराधितो देवयदि नो दिशसे वरम् ।
अजेयाः शत्रुहन्तारस्तथैव चिरजीविनः ।
प्रभविष्णवो भवामेति परस्परमनुव्रताः ॥ १३ ॥

एवं भविष्यतीत्युक्त्वा सुकेशतनयान्प्रभुः ।
प्रययौ ब्रह्मलोकाय ब्रह्मा ब्राह्मणवत्सलः ॥ १४ ॥

वरं लब्ध्वा ततः सर्वे राम रात्रिंचरास्तदा ।
सुरासुरान्प्रबाधन्ते वरदानात्सुनिर्भयाः ॥ १५ ॥

तैर्वध्यमानास्त्रिदशाः सर्षिसङ्घाः सचारणाः ।
त्रातारं नाधिगच्छन्ति निरयस्था यथा नराः ॥ १६ ॥

अथ ते विश्वकर्माणं शिल्पिनां वरमव्ययम् ।
ऊचुः समेत्य संहृष्टा राक्षसा रघुसत्तम ॥ १७ ॥

गृहकर्ता भवानेव देवानां हृदयेप्सितम् ।
अस्माकमपि तावत्त्वं गृहं कुरु महामते ॥ १८ ॥

हिमवन्तं समाश्रित्य मेरुं मन्दरमेव वा ।
महेश्वरगृहप्रख्यं गृहं नः क्रियतां महत् ॥ १९ ॥

विश्वकर्मा ततस्तेषां राक्षसानां महाभुजः ।
निवासं कथयामास शक्रस्येवामरावतीम् ॥ २० ॥

दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः ।
शिखरे तस्य शैलस्य मध्यमेऽम्बुदसंनिभे ।
शकुनैरपि दुष्प्रापे टङ्कच्छिन्नचतुर्दिशि ॥ २१ ॥

त्रिंशद्योजनविस्तीर्णा स्वर्णप्राकारतोरणा ।
मया लङ्केति नगरी शक्राज्ञप्तेन निर्मिता ॥ २२ ॥

तस्यां वसत दुर्धर्षाः पुर्यां राक्षससत्तमाः ।
अमरावतीं समासाद्य सेन्द्रा इव दिवौकसः ॥ २३ ॥

लङ्का दुर्गं समासाद्य राक्षसैर्बहुभिर्वृताः ।
भविष्यथ दुराधर्षाः शत्रूणां शत्रुसूदनाः ॥ २४ ॥

विश्वकर्मवचः श्रुत्वा ततस्ते राम राक्षसाः ।

सहस्रानुचरा गत्वा लङ्कां तामवसन्पुरीम् ॥ २५॥

दृढप्राकारपरिखां हैमैर्गृहशतैर्वृताम् ।
लङ्कामवाप्य ते हृष्टा विहरन्ति निशाचराः ॥ २६॥

नर्मदा नाम गन्धर्वी नानाधर्मसमेधिता ।
तस्याः कन्या त्रयं ह्यासीद्धीश्रीकीर्तिसमद्युति ॥ २७॥

ज्येष्ठक्रमेण सा तेषां राक्षसानामराक्षसी ।
कन्यास्ताः प्रददौ हृष्टा पूर्णचन्द्रनिभाननाः ॥ २८॥

त्रयाणां राक्षसेन्द्राणां तिस्रो गन्धर्वकन्यकाः ।
मात्रा दत्ता महाभागा नक्षत्रे भगदैवते ॥ २९॥

कृतदारास्तु ते राम सुकेशतनयाः प्रभो ।
भार्याभिः सह चिक्रीडुरप्सरोभिरिवामराः ॥ ३०॥

तत्र माल्यवतो भार्या सुन्दरी नाम सुन्दरी ।
स तस्यां जनयामास यदपत्यं निबोध तत् ॥ ३१॥

वज्रमुष्टिर्विरूपाक्षो दुर्मुखश्चैव राक्षसः ।
सुप्तघ्नो यज्ञकोपश् च मत्तोन्मत्तौ तथैव च ।
अनला चाभवत्कन्या सुन्दर्यां राम सुन्दरी ॥ ३२॥

सुमालिनोऽपि भार्यासीत्पूर्णचन्द्रनिभानना ।
नाम्ना केतुमती नाम प्राणेभ्योऽपि गरीयसी ॥ ३३॥

सुमाली जनयामास यदपत्यं निशाचरः ।
केतुमत्यां महाराज तन्निबोधानुपूर्वशः ॥ ३४॥

प्रहस्तोऽकम्पनैश्चैव विकटः कालकार्मुकः ।
धूम्राक्षश्चाथ दण्डश्च सुपार्श्वश्च महाबलः ॥ ३५॥

संह्रादिः प्रघसश्चैव भासकर्णश्च राक्षसः ।
राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिता ।
कुम्भीनसी च इत्येते सुमालेः प्रसवाः स्मृताः ॥ ३६॥

मालेस्तु वसुदा नाम गन्धर्वी रूपशालिनी ।
भार्यासीत्पद्मपत्राक्षी स्वक्षी यक्षी वरोपमा ॥ ३७॥

सुमालेरनुजस्तस्यां जनयामास यत्प्रभो ।
अपत्यं कथ्यमानं तन्मया त्वं शृणु राघव ॥ ३८॥

अनलश्चानिलश्चैव हरः सम्पातिरेव च ।
एते विभीषणामात्या मालेयास्ते निशाचराः ॥ ३९॥

ततस्तु ते राक्षसपुङ्गवास्त्रयो
निशाचरैः पुत्रशतैश्च संवृताः ।
सुरान्सहेन्द्रानृषिनागदानवान्
बबाधिरे ते बलवीर्यदर्पिताः ॥ ४०॥

जगद्भ्रमन्तोऽनिलवद्दुरासदा
रणे च मृत्युप्रतिमाः समाहिताः ।
वरप्रदानादभिगर्विता भृशं
क्रतुक्रियाणां प्रशमं कराः सदा ॥ ४१॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com